# आदर्शपाठयोजना (2023-24)
## (संस्कृत-गद्यशिक्षणम्)

| | | |
|---|---|---|
| **विषयः - संस्कृतम्** | **कालांशः - तृतीयः** | **कक्षा - नवमी** |
| **पाठस्य नाम - “पर्यावरणम्”** | **अवधिः - 40 निमेषाः** | **दिनाङ्कः - 28.03.23** |

### 1. अधिगमस्य प्रतिफलानि –

i. छात्रेषु संस्कृतकाव्यं प्रति रुच्युत्पादनम्।
ii. छात्रेषु कोमलभावानां विकासकरणम्।
iii. छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासकरणम्।
iv. छात्रेषु श्रवणस्य भाषणस्य पठनस्य लेखनस्य चेतेषां चतुर्णां भाषिककौशलानां विकासकरणम्।
v. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।
vi. छात्रेषु लिपिज्ञानवर्द्धनम्।
vii. छात्रेषु गद्यगतभावानाम् अवबोधनक्षमतायाः विकासकरणम्।

### 2. अनुदेशात्मकानि उद्देश्यानि –

प्रस्तुतपाठं **'पर्यावरणम्'** पठित्वा छात्राः पाठस्य अर्थम् अवगन्तुं योग्याः भविष्यन्ति।

**ज्ञानात्मकपक्षः –**

i. छात्राः वृक्षारोपणस्य महत्त्वं प्रति जागरुकाः भविष्यन्ति।
ii. छात्राः पाठे निहितान् क्लिष्टशब्दान् परिभाषितान् करिष्यन्ति।

**बोधात्मकपक्षः –**

i. छात्राः **'पर्यावरणम्'** इत्यस्य पाठस्य हिन्दीव्याख्यां कर्तुं समर्थाः भविष्यन्ति।
ii. छात्राः पाठे निहितभावसाम्यस्य स्पष्टीकरणं करिष्यन्ति।

**प्रयोगात्मकपक्षः –**

i. छात्राः पर्यावरणस्य महत्त्वं ज्ञात्वा पर्यावरणसंरक्षणे क्रियाशीलाः भविष्यन्ति।
ii. छात्राः पर्यावरणस्य शुद्धतायै वृक्षारोपणं करिष्यन्ति।

## 3. शिक्षणविधयः -

व्याख्यानविधिः अर्थकथनविधिः
प्रश्नोत्तरविधिः मूल्याङ्कनविधिः

## 4. शिक्षणाधिगमसामग्री -

श्यामपट्टः सुधाखण्डः मार्जनी
पाठ्यपुस्तकम् सङ्केतकः

## 5. पूर्वज्ञानानुमानम् -

छात्राः '**पर्यावरणम्**' इत्यस्मिन् विषये पूर्वमेव किञ्चित् जानन्ति एव।

## 6. पूर्वज्ञानपरीक्षणम् -

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः |
|---|---|
| 1. 'ढकना' इत्यस्य संस्कृतानुवादः कः?<br>2. अस्मान् परितः यद् आवरणं तत् किं कथ्यते?<br>3. **पर्यावरणस्य** अस्माकं जीवने किं महत्त्वम्? | छादनम्, आवरणम्<br>**पर्यावरणम्**<br>छात्राः निरुत्तराः (समस्यात्मकः प्रश्नः) |

## 7. उद्देश्यकथनम् -

अद्य वयं "**पर्यावरणम्**" इति नामकं पाठं पठित्वा पर्यावरणस्य महत्त्वविषये ज्ञास्यामः।

## 8. प्रस्तुतीकरणम् -

| शिक्षणबिन्दवः | अध्यापकस्य क्रियाः | छात्राणां क्रियाः | श्यामपट्टकार्यम् |
|---|---|---|---|
| आदर्शवाचनम् | अध्यापकः समुचितरूपेण गति-यति-लयानुसारं मूलपाठस्य आदर्शवाचनं करोति ।<br>**गद्यांशः** - प्रकृतिः समेषां प्राणिनां ......................... मानवाय क्व मङ्गलम्? | छात्राः ध्यानेन शृण्वन्ति। | पाठ-11, "**पर्यावरणम्**" |
| अनुकरणवाचनम् | अध्यापकः छात्रान् समुचितरूपेण गति-यति-लयानुसारं गद्यस्य अनुवाचनं कर्तुं कथयिष्यति। | छात्राः निर्देशानुसारं गद्यस्य अनुवाचनं कुर्वन्ति। | |
| अशुद्धेः संशोधनम् | अध्यापकः अनुवाचनसमये छात्रै उच्चारितानाम् अशुद्धशब्दानां संशोधनं छात्राणां सहायतया श्यामफलके लिखित्वा वाचयित्वा च करिष्यति। | छात्राः शुद्धशब्दानाम् अनुवाचनं कृत्वा उत्तरपुस्तिकायां प्रतिलेखस्योपरि लिखन्ति। | आव्रियते<br>मातृगर्भे |

| | | | |
|---|---|---|---|
| **काठिन्यनिवारणम्** | अध्यापकः गद्ये विद्यमानानां कठिनशब्दानां क्रमेणार्थावबोधनं कारयिष्यति। श्यामफलके अपि लेखिष्यति।<br><br>अध्यापकः कक्षायां भ्रमित्वा छात्राणां सहभागितां सुनिश्चितां करिष्यति लिखितकार्यस्य च निरीक्षणं करिष्यति। | छात्राः ध्यानेन स्वप्रतिलेखस्योपरि लिखन्ति। | **समेषाम्** = सर्वेषाम्<br>**कोपैः** = क्रोधैः<br>**वात्याः चक्रैः** = वातचक्रैः |
| **बोधप्रश्नाः** | 1. प्रकृतिः केषां संरक्षणाय यतते?<br>2. प्रकृतिः सर्वान् कैः तर्पयति?<br>3. अजातशिशुः कुत्र सुरक्षितः तिष्ठति?<br>4. प्रमुखानि तत्त्वानि मिलित्वा किं रचयन्ति? | 1. प्राणिनाम्<br>2. सुखसाधनैः<br>3. मातृगर्भे<br>4. पर्यावरणम् | |
| **मौनवाचनम्** | अध्यापकः छात्रान् गद्यानां मौनवाचनं कर्तुं कथयिष्यति। | छात्राः मौनवाचनं करिष्यन्ति। | |
| **भाषानुवादः** | प्रकृति समस्त प्राणियों के संरक्षण के लिए प्रयत्न करती रहती है। यह सबका पोषण करती है और अनेक प्रकार के सुख-साधनों द्वारा सबको तृप्त करती है। पृथ्वी, जल, अग्नि, वायु और आकाश इसके प्रमुख तत्त्व हैं। वे ही मिलकर अथवा अलग-अलग हमारे पर्यावरण की रचना करते हैं। संसार चारों ओर से जिसके द्वारा आच्छादित किया जाता है, वह पर्यावरण है। जिस प्रकार अजन्मा शिशु माता के गर्भ में सुरक्षित रहता है, उसी प्रकार मनुष्य पर्यावरण की कोख में सुरक्षित रहता है। परिष्कृत और प्रदूषणरहित पर्यावरण हमारे लिए सांसारिक जीवन के सुख, सद्विचार, सत्सङ्कल्प और माङ्गलिक सामग्री प्रदान करता है। प्रकृति के क्रोध से आतङ्कित मनुष्य क्या कर सकता है? बाढ़, अग्नि के भय, भूकम्पों, तूफानों और उल्कापात आदि के द्वारा सन्तप्त मनुष्य का कल्याण कहाँ है? अर्थात् प्रदूषण से रहित प्रकृति के अतिरिक्त कहीं भी मनुष्य का कल्याण सम्भव नहीं है। | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | |

| **9. पुनरावृत्तिकार्यम् –** | | |
|---|---|---|
| प्रश्नः 1. परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति? | 1. परिष्कृतपर्यावरणम् अस्मभ्यं सांसारिक सुखं सद्विचारं सत्यसङ्कल्पं माङ्गलिकसामग्रीं च प्रददाति। | |
| प्रश्नः 2. स्वार्थान्धः मानवः किं करोति? | 2. स्वार्थान्धः मानवः पर्यावरणं नाशयति। | |
| प्रश्नः 3. . पर्यावरणं किम् अस्ति? | 3. आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। | |

**10. गृहकार्यम् -**

1. **'पर्यावरणम्'** इति विषयमधिकृत्य पञ्चवाक्यानि लिखत।
2. मानवः कुत्र सुरक्षितः तिष्ठति?
3. प्रकृतेः प्रमुखानि तत्त्वानि कानि सन्ति?
4. **'गर्भे'** इत्यस्य शब्दस्य पर्यायपदं किम्?
5. **'पर्यावरणम्'** इत्यस्य प्रकृतेः प्रत्ययस्य च निर्देशं कुरुत।
6. उपसर्गान् पृथक् कृत्वा लिखत - प्रभवति, निवसन्ति, उपगता, प्रतिभाति।

## सन्दर्भः –

**"पर्यावरणम्"** अयं पाठः हरियाणा-विद्यालय-शिक्षा-बोर्डतः प्रमाणितात् नवम्याः कक्षायाः **'शेमुषी भाग-1'** पाठ्यपुस्तकाद् उद्धृतः।